# Kumara Suktam

# કુમારસૂક્તમ્

## Document Information

Text title : kumArasUkta

File name : kumArasUktam.itx

Category : veda, svara, sUkta, subrahmanya

Location : doc_veda

Description-comments : Rigveda 4.15 and 5.02

Source : https://sanskritdocuments.org/mirrors/rigveda/e-text.htm

Latest update : April 13, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 13, 2024

*sanskritdocuments.org*

# કુમારસૂક્તમ્

ઋષિઃ વામદેવઃ, દેવતા ૧-૬ અગ્નિઃ, ૭-૮ સોમકઃ સાહદેવ્યઃ, ૧૦ અશ્વિનૌ,
છન્દઃ ૧,૪ ગાયત્રી, ૨,૫,૬ વિરાડ્ગાયત્રી, ૩, ૭-૧૦ નિચૃદ્ગાયત્રી
સ્વરઃ ષડ્જઃ

અગ્નિર્હોતા નો અધ્વરે વાજી સન્પરિ ણીયતે ।
દેવો દેવેષુ યજ્ઞિયઃ ॥ ૪.૦૧૫.૦૧
પરિ ત્રિવિષ્ટ્યધ્વરં યાત્યગ્ની રથીરિવ ।
આ દેવેષુ પ્રયો દધત્ ॥ ૪.૦૧૫.૦૨
પરિ વાજપતિઃ કવિરગ્નિર્હવ્યાન્યક્રમીત્ ।
દધદ્રત્નાનિ દાશુષે ॥ ૪.૦૧૫.૦૩
અયં યઃ સૃઞ્જયે પુરો દૈવવાતે સમિધ્યતે ।
દ્યુમાઁ અમિત્રદમ્ભનઃ ॥ ૪.૦૧૫.૦૪
અસ્ય ઘા વીર ઈવતોઽગ્નેરીશીત મર્ત્યઃ ।
તિગ્મજમ્ભસ્ય મીળ્હુષઃ ॥ ૪.૦૧૫.૦૫
તમર્વન્તં ન સાનસિમરુષં ન દિવઃ શિશુમ્ ।
મર્મૃજ્યન્તે દિવેદિવે ॥ ૪.૦૧૫.૦૬
બોધદ્યન્મા હરિભ્યાં કુમારઃ સાહદેવ્યઃ ।
અચ્છા ન હૂત ઉદરમ્ ॥ ૪.૦૧૫.૦૭
ઉત ત્યા યજતા હરી કુમારાત્સાહદેવ્યાત્ ।
પ્રયતા સદ્ય આ દદે ॥ ૪.૦૧૫.૦૮
એષ વાં દેવાવશ્વિના કુમારઃ સાહદેવ્યઃ ।
દીર્ઘાયુરસ્તુ સોમકઃ ॥ ૪.૦૧૫.૦૯
તં યુવં દેવાવશ્વિના કુમારં સાહદેવ્યમ્ ।

દીર્ઘાયુષં કૃણોતન ॥ ૪.૦૧૫.૧૦

ઋષિઃ-૧, ૩-૮, ૧૦-૧૨ કુમાર આત્રેયો, વૃશો વા જાર ઉભી વા;
૨, ૯ વૃશો જારઃ ॥

દેવતા- અગ્નિઃ ॥
છન્દઃ-૧, ૩, ૭, ૮ ત્રિષ્ટુપઃ ૨ સ્વરાટ્પઙ્ક્તિઃ ૪, ૫, ૯, ૧૦ નિવૃત્રિષ્ટુપ;
૬ ભુરિવપઙ્ક્તિઃ ૧૧ વિરાટ્ત્રિષ્ટુપ્; ૧૨ નિચૃદતિજગતી ॥

સ્વરઃ- ૧, ૩-૫, ૭-૧૧ ધૈવતઃ; ૨, ૬ પઞ્ચમઃ, ૧૨ નિષાદઃ ॥

કુમારં માતા યુવતિઃ સમુબ્ધં ગુહા બિભર્તિ ન દદાતિ પિત્રે ।
અનીકમસ્ય ન મિનજ્જનાસઃ પુરઃ પશ્યન્તિ નિહિતમરતૌ ॥ ૫.૦૦૨.૦૧
કમેતં ત્વં યુવતે કુમારં પેષી બિભર્ષિ મહિષી જજાન ।
પૂર્વીર્હિ ગર્ભઃ શરદો વવર્ધાપશ્યં જાતં યદસૂત માતા ॥ ૫.૦૦૨.૦૨
હિરણ્યદન્તં શુચિવર્ણમારાત્ક્ષેત્રાદપશ્યમાયુધા મિમાનમ્ ।
દદાનો અસ્મા અમૃતં વિપૃક્વત્કિં મામનિન્દ્રાઃ કૃણવન્નનુક્થાઃ ॥ ૫.૦૦૨.૦૩
ક્ષેત્રાદપશ્યં સનુતશ્ચરન્તં સુમદ્યૂથં ન પુરુ શોભમાનમ્ ।
ન તા અગૃભ્રન્નજનિષ્ટ હિ ષઃ પલિક્નીરિદ્યુવતયો ભવન્તિ ॥ ૫.૦૦૨.૦૪
કે મે મર્યકં વિ યવન્ત ગોભિર્ન યેષાં ગોપા અરણશ્ચિદાસ ।
ય ઈં જગૃભુરવ તે સૃજન્ત્વાજાતિ પશ્વ ઉપ નશ્ચિકિત્વાન્ ॥ ૫.૦૦૨.૦૫
વસાં રાજાનં વસતિં જનાનામરાતયો નિ દધુર્મર્ત્યેષુ ।
બ્રહ્માણ્યત્રેરવ તં સૃજન્તુ નિન્દિતારો નિન્દ્યાસો ભવન્તુ ॥ ૫.૦૦૨.૦૬
શુનશ્ચિચ્છેપં નિદિતં સહસ્રાદ્યૂપાદમુઞ્ચો અશમિષ્ટ હિ ષઃ ।
એવાસ્મદગ્ને વિ મુમુગ્ધિ પાશાન્હોતશ્ચિકિત્વ ઇહ તૂ નિષદ્ય ॥ ૫.૦૦૨.૦૭
હૃણીયમાનો અપ હિ મદૈયેઃ પ્ર મે દેવાનાં વ્રતપા ઉવાચ ।
ઇન્દ્રો વિદ્વાઁ અનુ હિ ત્વા ચચક્ષ તેનાહમગ્ને અનુશિષ્ટ આગામ્ ॥ ૫.૦૦૨.૦૮
વિ જ્યોતિષા બૃહતા ભાત્યગ્નિરાવિર્વિશ્વાનિ કૃણુતે મહિત્વા ।
પ્રાદેવીર્માયાઃ સહતે દુરેવાઃ શિશીતે શ઼ૃઙ્ગે રક્ષસે વિનિક્ષે ॥ ૫.૦૦૨.૦૯
ઉત સ્વાનાસો દિવિ ષન્ત્વગ્નેસ્તિગ્માયુધા રક્ષસે હન્તવા ઉ ।
મદે ચિદસ્ય પ્ર રુજન્તિ ભામા ન વરન્તે પરિબાધો અદેવીઃ ॥ ૫.૦૦૨.૧૦

એતં તે સ્તોમં તુવિજાત વિપ્રો રથં ન ધીરઃ સ્વપા અતક્ષમ્ ।
યદીદગ્ને પ્રતિ ત્વં દેવ હર્યાઃ સ્વર્વતીરપ એના જયેમ ॥ ૫.૦૦૨.૧૧
તુવિગ્રીવો વૃષભો વાવૃધાનોઽશત્ર્વ૧ર્યઃ સમજાતિ વેદઃ ।
ઇતીમમગ્નિમમૃતા અવોચન્બર્હિષ્મતે મનવે શર્મ યંસદ્ધવિષ્મતે મનવે શર્મ યંસત્ ॥ ૫.૦૦૨.૧૨

# કુમારસૂક્તમ્

## કુમારસૂક્તં સ્વરરહિતમ્

અગ્નિર્હોતા નો અધ્વરે વાજી સન્પરિ ણીયતે ।
દેવો દેવેષુ યજ્ઞિયઃ ॥ ૪.૦૧૫.૦૧
પરિ ત્રિવિષ્ટ્યધ્વરં યાત્યગ્ની રથીરિવ ।
આ દેવેષુ પ્રયો દધત્ ॥ ૪.૦૧૫.૦૨
પરિ વાજપતિઃ કવિરગ્નિર્હવ્યાન્યક્રમીત્ ।
દધદ્રત્નાનિ દાશુષે ॥ ૪.૦૧૫.૦૩
અયં યઃ સૃઞ્જયે પુરો દૈવવાતે સમિધ્યતે ।
દ્યુમાઁ અમિત્રદમ્ભનઃ ॥ ૪.૦૧૫.૦૪
અસ્ય ઘા વીર ઈવતોऽગ્નેરીશીત મર્ત્યઃ ।
તિગ્મજમ્ભસ્ય મીળ્હુષઃ ॥ ૪.૦૧૫.૦૫
તમર્વન્તં ન સાનસિમરુષં ન દિવઃ શિશુમ્ ।
મર્મૃજ્યન્તે દિવેદિવે ॥ ૪.૦૧૫.૦૬
બોધદ્યન્મા હરિભ્યાં કુમારઃ સાહદેવ્યઃ ।
અચ્છા ન હૂત ઉદરમ્ ॥ ૪.૦૧૫.૦૭
ઉત ત્યા યજતા હરી કુમારાત્સાહદેવ્યાત્ ।
પ્રયતા સદ્ય આ દદે ॥ ૪.૦૧૫.૦૮
એષ વાં દેવાવશ્વિના કુમારઃ સાહદેવ્યઃ ।
દીર્ઘાયુરસ્તુ સોમકઃ ॥ ૪.૦૧૫.૦૯
તં યુવં દેવાવશ્વિના કુમારં સાહદેવ્યમ્ ।
દીર્ઘાયુષં કૃણોતન ॥ ૪.૦૧૫.૧૦

કુમારં માતા યુવતિઃ સમુબ્ધં ગુહા બિભર્તિ ન દદાતિ પિત્રે ।
અનીકમસ્ય ન મિનજ્જનાસઃ પુરઃ પશ્યન્તિ નિહિતમરતૌ ॥ ૫.૦૦૨.૦૧
કમેતં ત્વં યુવતે કુમારં પેષી બિભર્ષિ મહિષી જજાન ।

પૂર્વીર્હિ ગર્ભઃ શરદો વવર્ધાપશ્યં જાતં યદસૂત માતા ॥ ૫.૦૦૨.૦૨
હિરણ્યદન્તં શુચિવર્ણમારાત્ક્ષેત્રાદપશ્યમાયુધા મિમાનમ્ ।
દદાનો અસ્મા અમૃતં વિપૃક્વત્કિં મામનિન્દ્રાઃ કૃણવન્નનુક્થાઃ ॥ ૫.૦૦૨.૦૩
ક્ષેત્રાદપશ્યં સનુતશ્ચરન્તં સુમદ્યૂથં ન પુરુ શોભમાનમ્ ।
ન તા અગૃભ્રન્નજનિષ્ટ હિ ષઃ પલિક્નીરિદ્યુવતયો ભવન્તિ ॥ ૫.૦૦૨.૦૪
કે મે મર્યકં વિ યવન્ત ગોભિર્ન યેષાં ગોપા અરણશ્ચિદાસ ।
ય ઈં જગૃભુરવ તે સૃજન્ત્વાજાતિ પશ્વ ઉપ નશ્ચિકિત્વાન્ ॥ ૫.૦૦૨.૦૫
વસાં રાજાનં વસતિં જનાનામરાતયો નિ દધુર્મર્ત્યેષુ ।
બ્રહ્માણ્યત્રેરવ તં સૃજન્તુ નિન્દિતારો નિન્દ્યાસો ભવન્તુ ॥ ૫.૦૦૨.૦૬
શુનશ્ચિચ્છેપં નિદિતં સહસ્રાદ્યૂપાદમુઞ્ચો અશમિષ્ટ હિ ષઃ ।
એવાસ્મદગ્ને વિ મુમુગ્ધિ પાશાન્હોતશ્ચિકિત્વ ઇહ તૂ નિષદ્ય ॥ ૫.૦૦૨.૦૭
હૃણીયમાનો અપ હિ મદૈયેઃ પ્ર મે દેવાનાં વ્રતપા ઉવાચ ।
ઇન્દ્રો વિદ્વાઁ અનુ હિ ત્વા ચચક્ષ તેનાહમગ્ને અનુશિષ્ટ આગામ્ ॥ ૫.૦૦૨.૦૮
વિ જ્યોતિષા બૃહતા ભાત્યગ્નિરાવિર્વિશ્વાનિ કૃણુતે મહિત્વા ।
પ્રાદેવીર્માયાઃ સહતે દુરેવાઃ શિશીતે શૃ‍ઙ્ગે રક્ષસે વિનિક્ષે ॥ ૫.૦૦૨.૦૯
ઉત સ્વાનાસો દિવિ ષન્ત્વગ્નેસ્તિગ્માયુધા રક્ષસે હન્તવા ઉ ।
મદે ચિદસ્ય પ્ર રુજન્તિ ભામા ન વરન્તે પરિબાધો અદેવીઃ ॥ ૫.૦૦૨.૧૦
એતં તે સ્તોમં તુવિજાત વિપ્રો રથં ન ધીરઃ સ્વપા અતક્ષમ્ ।
યદીદગ્ને પ્રતિ ત્વં દેવ હર્યાઃ સ્વર્વતીરપ એના જયેમ ॥ ૫.૦૦૨.૧૧
તુવિગ્રીવો વૃષભો વાવૃધાનોઽશત્ર્વર્યઃ સમજાતિ વેદઃ ।
ઇતીમમગ્નિમમૃતા અવોચન્બર્હિષ્મતે મનવે શર્મ યંસદ્ધવિષ્મતે
મનવે શર્મ યંસત્ ॥ ૫.૦૦૨.૧૨

*Kumara Suktam*

pdf was typeset on April 13, 2024

Please send corrections to *sanskrit@cheerful.com*